# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2017 - ’18

**Class : VI** **Marks : 80**
**Time : 2½ hrs**

# संस्कृतम्
## खण्डः क (अपठित अवबोधनम्)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तरं लिखत।**

कृष्णमुर्तिः श्रीकण्ठश्च मित्रे आस्ताम्। श्रीकण्ठस्य पिता धनिकः आसीत्। अतः तस्य भवने सर्वविधानि सुख-साधनानि आसन्। तस्मिन् विशाले भवने चत्वारिंशत् स्तम्भाः, अष्टादश प्रकोष्ठाः च आसन्। तत्र दश सेवकाः निरन्तरं कार्यं कुर्वन्ति स्म। परं कृष्णमूर्तेः माता पिता च निर्धनौ आस्ताम्। तस्य गृहम् आडम्बरविहीनं साधारणं च आसीत्।

**I. एकपदेन उत्तरत।** 4

क. कस्य पिता धनिकः आसीत्?
ख. तस्मिन् भवने कति स्तम्भाः आसन्?
ग. के निरन्तरं कार्यं कुर्वन्ति स्म?
घ. कौ निर्धनौ आस्ताम्?

**II. पूर्णवाक्येन उत्तरत।** 2

क. कृष्णमूर्तेः गृहं कीदृशम् आसीत्?

**III. भाषिककार्यम्।** 4

क. ‘सर्वविधानि सुखसाधनानि’ अत्र किं विशेषणपदम्?
ख. ‘भवनं’ इत्यर्थे अत्र कः शब्दः प्रयुक्तः?
ग. ‘निर्धनः’ इति पदस्य अत्र किं विपरीतपदम्?
घ. तस्य भवने ------- प्रकोष्ठाः आसन्।

## खण्डः ख (रचनात्मक लेखनम्)

**2. चित्रं दृष्ट्वा मञ्जूषातः पदानि प्रयुज्य पञ्च वाक्यानि रचयत।** 10



मञ्जूषा

| लिखति, कक्षायां, श्यामपट्टे, पुस्तकं, शिक्षकः, छात्राः, उत्तराणि, प्रश्नम्, लिखन्ति |
| --- |

**3. अधोलिखितां कथां मञ्जूषातः उचित पदानि चित्वा पूरयित्वा लिखत।** 5

एकस्मिन् वने एका 1. ------ एकः सिंहः च निवसतः स्म। एकदा 2. ----- सिंहः 3. ------- शयनं करोति स्म। सहसा सिंहस्य 4. ------- उपरि एका 5. ------- भ्रमणं कृतवती। तेन कारणेन 6. -------- जागृतः। सः मूषिकां 7. ------। मूषिका उक्तवती - स्वामिन्! मम 8. ------ क्षमस्व। माम् मुञ्चतु। मूषिकायाः शिष्टव्यवहारेण अपराधस्य स्वीकृतिकारणात् च सिंहः 9. ------ तां मुक्तवान्। मूषिका उक्तवती अहं भवतः 10. ------- करिष्यामि।

मञ्जूषा

| अपराधं, गुहायां, दयया, मूषिका, वने, शरीरस्य, सिंहः, मूषिका, गृहीतवान्, उपकारं |
| --- |

## खण्डः ग (अनुप्रयुक्त व्याकरणम्)

**4. अधोलिखित शब्दानां विभक्ति वचनं च लिखत।** 2

क. पाकशालायाम् ख. मम ग. विनयान् घ. पुस्तकालयेषु

**5. संस्कृत भाषायां संख्यावाचक शब्दानि लिखत।** 5

16 to 25

**6. 'पा' धातोः लृट् लकार रूपाणि लिखत।** 4

**7. क्त्वा, ल्यप् प्रत्ययान्त रूपस्य प्रयोगं कृत्वा एकं वाक्यं लिखत।** 3

क. भवान् पाठं पठति, श्रावयति। (क्त्वा)

ख. भक्तः पुष्पम् आनयति, पूजनं करोति। (ल्यप्)

ग. माता वस्त्रं नयति, प्रसारयति। (क्त्वा)

**8. आकारान्त 'लता' शब्दस्य विभक्ति रूपाणि लिखत।** 8

**9. वाक्यानि शोधयत।** 3

क. षड् गुणाः अस्ति।

ख. उत्तमाः नरः मानम् इच्छति।

ग. आलस्यं सम्पदं हनन्ति।

## खण्डः घ (पठित अवबोधनम्)

**10. अर्थं लिखत।** 4

क. सम्भ्रमः ख. परेषाम् ग. प्रसिद्धानि घ. ज्ञानसमम्

ङ. प्रविधिः च. अवनम्य छ. श्रृगालः ज. दैन्यम्

**11. सन्धि / सन्धिच्छेदं कुरुत।** 4

क. अन्यैः + च ख. किमसौ ग. नष्टमेव घ. विद्यालये + अपि

**12. पर्यायपदानि लिखत।** 3

क. वृक्षः ख. जलम् ग. गृहम्

**13. विपरीतपदं लिखत।** 3

क. श्वेतः ख. देवः ग. सज्जनः

**14. उचितपदेन पूरयत।** **6**

क. विद्या -------- ददाति।

ख. भवान् अत्यन्तं -------- गीतं गायति।

ग. जलस्य ---------- निवारणे जीवाः सहायकाः भवन्ति।

घ. पुस्तकालये --------- प्रभावः दृश्यते।

ङ. ------- पूतं जलं पिबेत्।

च. मूर्खः मकरः --------- भूत्वा गृहं गतवान्।

**15. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकस्याः नद्याः तटे एकः जम्बूवृक्षः आसीत्। तस्य शाखायाम् एकः वानरः वसति स्म। सः पक्वानि जम्बूफलानि खादति स्म। एकदा एकः मकरः नद्याः तटम् आगतः। वानरः मकरस्य कृते पक्वानि जम्बूफलानि दत्तवान्। सः मकरः कतिचन जम्बूफलानि स्वयं खादितवान्। कतिचन भार्यायाः कृते गृहं नीतवान्। तस्य भार्या मकरं प्रति उक्तवती - "अहं जम्बूफलानि न खादिष्यामि। अहं तस्य वानरस्य मधुरं हृदयं खादिष्यामि।" अपरस्मिन् दिने मकरः पुनः तटम् आगतवान्। सः वानरं प्रति अवदत्। "मित्र! मम भार्या त्वां गृहे निमन्त्रितवती। आगच्छ, मम पृष्टे उपविश, अहं त्वां तत्र नयामि।"

**प्रश्नाः** **5**

क. वानरः मकराय कानि दत्तवान्?

ख. मकरः जम्बूफलानि कस्यै नीतवान्?

ग. मकरः वानरं प्रति किम् अकथयत्?

घ. वानरः कुत्र वसति स्म?

ङ. मकरस्य पत्नी किम् उक्तवती?

**16. अधोलिखित श्लोकान् पठित्वा प्रश्नान् उत्तरत।**

"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥"
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्
शास्त्रपूतं वदेत् वाक्यं मनः पूतं समाचरेत् ॥
विद्या ददाति विनयं विनयाद् याति पात्रताम्
पात्रत्वात् धनमाप्नोति धनाद् धर्मः ततः सुखम् ॥

**प्रश्नाः** **5**

क. कार्याणि केन सिद्ध्यन्ति?

ख. कीदृशं वाक्यं वदेत्?

ग. विद्या किं ददाति?

घ. अस्माभिः किं समाचरेत्?

ङ. कार्याणि केन न सिद्ध्यन्ति?